र्वतस्य विशेषणत्वेनुमितौ विशेष्यतया भानं तस्मादिति भावः मानाभावादिति उक्तव्याप्तौ मानाभावादित्यर्थः
अप्रांतमिति पक्षधर्मस्येंधनादेर्जलादावपि सत्वेन वह्न्यादौ तत्समानाधिकरणाभावप्रतियोगित्वस्यैव सत्वा
दिति भावः। केवलान्वयिसाध्ये संभवत्येवातं तादृशान्नमतो वह्न्यादावित्युक्तं अतिप्रसक्तमिति धूमादिः पक्ष
धर्मसमानाधिकरणाभावीयघटादिनिष्ठप्रतियोगित्वाभाववद्वह्न्यादिपक्षधर्मात्यनुमित्यापादकमित्यर्थः अव्या
पकमिति पक्षे वह्नौ धूमसामान्यव्यापकत्वं धूमे च पक्षवृत्तित्वं गृहीतं यत्र तत्र पक्षवृत्तिधूमं तत्रापि न व्यापकत्वाग्र
हेणानुमित्युत्पत्तेरादिति भावः। अत्र धूमे पक्षवृत्तित्वमुपलक्षणं साध्ये धूमसामान्यव्यापकत्वावगाहिनः पक्ष
वृत्तिधूमव्यापको वह्निरित्येवं विशिष्टवैशिष्ट्यावगाहिज्ञानस्य हेतुत्वस्युरचमवक्तात एव ज्ञातित्वमुपलक्षीकृतं मनो
पवह्निज्ञानभावस्याग्रहः। पर्वतादौ सर्वेषामतोऽतएव च वह्निस्वर्गादौ वैज्ञानस्य स्वरूपतोऽनुपस्थितावपि वह्नित्वादिसमा

नाधिकरणत्वातिव्यनुपलब्धीकस्य वह्नित्वादिसमानाधिकरणतावच्छिन्ननियतपूर्ववर्तितावच्छेदकस्वरूपं यत्नादि
कारणतावच्छेदकत्वं मीमांसकेतिन याचप्रमेतरीयं तत्तद्गुण एव कालांतरीयं च पक्षधर्मताज्ञानमात्रमपि तिप्रसंगात्तत
तद्गुणीयत्वादिप्रवेशेनं न कार्यकारणभावापत्तिरिति भावः अग्रे क देशप्रयत्नस्य व्यापकसाध्यकत्वमेवास्तां व्या
दिसत्तायां च साधनवच्छिन्नाभावाप्रतियोगिसाध्यकहेतुमानुपपत्तौ इत्येवं परामर्शस्यास्य साध्यसामानाधिकरण्यभानानि
यमात्ताद्धियो हेतुत्वेमानाभावः साधनांशे तादृशसाध्यप्रकारताया अस्यापि ज्ञानायत्वादिति तु चिंतनीयं ननु कु क
मेण स्वर्गकामो यजेतेत्यादिवेदादप्यन्वयासिद्ध अनिरूपकस्वर्गव्यापकतावच्छेदकधर्मवत्तापर्यवसितस्य स्वर्गया
गसाध्यस्वर्गको याग इत्याकारक एव तत्र यागवदन्यावृत्तित्वघटितं यागसाध्यत्वं स्वर्गत्वस्यामानाधिकरण्येने व
भासत इति न कापि क्षतिरित्याशये ऽन्यवृत्तित्वे ऽभावे चरखंडरूपो विधिशेषेव मियोऽव्याप्तिशिष्टतामसंभवादि
तिभावः केचित्तु स्वर्गाभावप्रयोजकाभावप्रतियोगितावच्छेदकधर्मवत्त्वलक्षणं स्वर्गसाधनत्वमेव विध्यर्थस्तच्चवि
37 जातीयस्वर्गत्वावच्छिन्नाभावस्यैव स्वर्गप्रतियोगिताभावत्वेन रूपेण यागत्वेन यवच्छिन्नाभावप्रयुक्तत्वं विषयीकृत्य
सुग्रहं प्रयुक्तत्वं च स्वरूपसंबंधविशेषः कारणतावच्छेदकावच्छिन्नाभावनिरूपितः कार्यतावच्छेदकावच्छिन्नाभावनिष्ठ
एवेति नातिप्रसंगः प्रयुक्तत्वादिवत् कारणत्वस्याप्यखंडत्वे तु मानुपपत्तिर्निशेषस्वर्गकारणाभावानयाग इत्येवं वि

घेर्वैधर्म्यसंभवादिति रिक्तस्यापि कारणत्वस्यान्यथासिद्धिनिरूपकनियतपूर्ववर्तितावच्छेदकधर्मव्याप्यतयैव वैजात्यादेः कल्पनीयत्वा
दिति प्राहुः ननु परिचायकत्वं यदि परिचयजनकत्वं तदा विशेषणताभावादिस्वघटितमूलासंगतिरतो व्याचष्टे परिचेयेति यद्यपि
परिचायकत्वं व्यावर्त्तकत्वमित्येव व्याख्यानमुचितं तथापि विवक्षितव्यावर्त्तकत्वाभावार्थं परिचयपदं नोपलक्षणतया
न व्यावर्त्तकधर्म्मान्तरोपस्थापकतया तथा च काकवत्त्वादिकं यथोपलक्षणतया पुरस्थापकतया गृहादिव्यावर्त्तकं तेन तथा लिंगं
धर्म्मान्तरोपस्थितिद्वारा परामर्शस्य व्यावर्त्तकं परामर्शतावच्छेदकोपलक्षणतया भावादित्यर्थः। तद्विव्यावर्त्तकत्वे मूलं लिंगमपी
ति विशेषणपरामर्शे नाचयितत्कारणत्वं तदर्थितत्वे सत्येव लिंगस्य विशेषणत्वसंभवादिति भावः। अन्यथेति न तस्य
विशेषणत्वेऽप्यन्यथासिद्धत्वे इति नार्थो विरोधादतः प्रकारान्तरेणावतारयति कारणतावच्छेदकतामात्रेणेत्यर्थः। यथाक्र
ते मत्तधर्म्मतावच्छेदकपर्वतत्वादिनान्यतायामादायार्थान्तरत्वापत्तेः सामान्यमुखी व्याप्तिमात्रविषयप्रत्यासत्तिमाह यावदिति
दितादृशी बुद्धिः विशेष्यविषयकाशाब्दबुद्धिः सामान्यव्याप्त्याविति तथा च धर्म्मस्वरूपं दर्शनं व्यर्थमत आह तादृशस्येति विशे
षणीभूतधूमसमानकालतया वह्न्यवगाहित्वस्येत्यर्थः धूमवान्पर्वतो वह्निमानित्यनुमितेरनुव्यवसायेन तस्यां तादृशाव
गाहित्वस्य ग्रहादिति भावः। ननु तादृशविशेषणजन्यत्वेऽपि तस्यैव लिंगजन्यत्वे सिद्धे तापमानतांशो व्यर्थ इत्यत आह तादृश
नेति चेति ननु यावद्विशेषणकाशाब्दविशिष्टबुद्धिः सा तज्जन्यैव व्याप्तिवस्तुतो तत्समानकालीनत्वादिप्रवेशे नेत्यत आह

साध्यविशिष्टेति तथा चानुमितेः साध्यसमानकालीनत्वावगाहित्वादेव न व्यभिचार इति भावः इत्यनुमितेरेवं प्रयोगस्थलीया
नुमितौ अनुमितेरुक्ताकारत्वाभावात् तथा च धूमध्वंसवान् पर्वतो धूमकालीनवह्निमानित्येवं धूमध्वंसहेतुकानुमितौ धूमस
मानकालत्वावगाहसत्त्वाद् विशिष्टबुद्धित्वस्य हेतोः सत्त्वात् धूमजन्यत्वरूपसाध्यस्य चासत्त्वाद् व्यभिचारः स्यादतो विशेष्यप
38 दमिति भावः तथा च तेव्यभिचारतादवस्थ्यात् व्याचष्टे विशेष्ये विशेषणताउपपत्रेति तथा च काऽनुमितौ विशेष्यपर्वते वि
शेषणतापन्नो न धूम इति तत्समानकालत्वावगाहित्वामपि तस्यां न व्यभिचार इति भावः धर्मान्तरेति स्वरूपकथनं न विवक्षि
तं वैयर्थ्यादसंभवभेदेनैकस्यैव लिंगसाध्यभावे नानुमितावुक्तैकमेव लिंगजन्यत्वस्यानुमानत्वसंगच्छेतेति ध्येयं ननु तदानीं
धूमवान् पर्वतो धूमकालीनवह्निमानित्याकारानुमिते विशेष्ये विशेषणीभूतस्य धूमस्य समानकालीनत्वेन धर्मान्तरस्य वह्नि
वैशिष्ट्यावगाहित्वात् अपि धूमध्वंसलिंगकत्वेन धूमाजन्यत्वाद् व्यभिचार इत्यत आह तदानीं धूमवान् पर्वत इत्यादिमतः पक्षे
तावच्छेदकस्याप्यनुमितिहेतुत्वमिति मतेपि व्यभिचारसंपत्त्यर्थं तदानीमित्युक्तं तेन विद्यमानध्वंसप्रतियोगिधूमवत्पर्व
तत्वेन पक्षतात् तदवच्छेदकीभूतस्य धूमस्यासत्त्वाभः विशेषणा इति साध्यविशेषणीभूतो यः कालस्तद्विशेषणतापन्न
स्यैवेत्यर्थः तथा त्वापन्नस्य विशेषणत्वापन्नस्य धूमस्य समानकालीनत्वं वह्नौ भासत इति पूर्वेणान्वयः यद्यपि विरोध्येवि
शेषणतापन्नो यो धूमस्तस्यैव समानकालीनत्वेन वह्नेरवगाहित्वात् तादृशानुमितौ धूमाजन्यायां व्यभिचारतादवस्थ्यं तथापि

पावह्निशेष्यनिरूपितपक्षधर्मविशिष्टनिरूपितविशेषणताव्युत्क्रमतद्धर्मसमानकालीनत्वावगाहिताकाशाद्भिन्नबुद्धिः स्यात्तद्वि
शेषणबुद्धिजन्यत्वस्य च तात्पर्यप्युक्तानुमितौ च पर्वते धूमस्य वह्निविशेषणत्वं तत्प्रयुक्तं न धूमसमानकालीनत्वावगाहित्वं भा
नाभावात् किंतु साध्यांशे विशेषणताप्रयुक्तमेवेति न व्यभिचारः नन्वेवं धूमवान् पर्वतो वह्निमानित्याद्यनुमितावपि विशे
ष्ये धूमस्य वह्निविशेषणत्वं तत्प्रयुक्तं धूमसमानकालीनत्वावगाहित्वमित्यसिद्धिरत आह अनुभवेति अयं विशेष्यविशे
षणताप्रयुक्तः विशेषणताविशेषः समानकालीनत्वावगाहितारूपः तादृशविषयत्वानुभवे विप्रतिपत्तेः कल्पां
तरमाह विशेषणमित्यादिना विधेयतावच्छेदकोपाधित्वेत्यस्य फलमाह धूमकालीनेत्यादि विधेयतेति विधेयता
वच्छेदकं धूमकालीनत्वं तदवच्छिन्ने धूमकालीनत्वं न भासते किंतु वह्नित्वावच्छिन्ने तथा च तदानीं धूमवान् पर्वतो धूम
कालीनवह्निमानित्याद्यनुमितौ धूमाजन्यायां व्यभिचारवारणार्थं तादिति भावः पक्षधर्मविशिष्टेत्यस्य फलमाह धू
मवान् पर्वत इत्यादिना न धूमवत्त्वविशिष्ट इति न धूमवत्त्वविशिष्टांशे इत्यर्थः उद्देश्यतावच्छेदककुक्षिनिक्षिप्तवस्तुनो
परस्परमुद्देश्यविधेयभावविरहादिति भावः। किंत्विति हेतुभूतालोकविशिष्टे पक्षमवदमि धूमकालीनवह्नि
मत्पर्वतत्वरूपपक्षतावच्छेदकं तदुपरि वह्निमत्त्वं भासत इत्यर्थः तथा च धूमजन्यायां तादृशानुमितौ व्यभिचारवारणा
र्थं पक्षधर्मविशिष्टपदं पक्षधर्मविशिष्टविशेष्यतावच्छेदकत्वं तु तदर्थः कथितस्थले तु धूमेन विशेष्यतावच्छेदकः स्या

त्वाद्धर्मिणि प्रकारतया च तस्यैव तथात्वात् किंतु विशेष्यतावच्छेदके कुक्षिनिक्षिप्त एव धर्मोऽत एव पक्षतायां तादृशविशिष्ट
पक्षतावच्छेदकीभूतधर्मस्यावच्छिन्नविशेष्यताकत्वं तु नार्थः पक्षीभूतानुमितौ स्वरूपासिद्धिप्रसंगात् धूमविशिष्टप
39 र्वतत्वस्यैव तत्र धर्मितावच्छेदकत्वादिति ध्येयं धूमकालीनवह्निमानित्याद्यनुमितौ व्यभिचारवारकं प्रकारान्तरमाह
सेव चेत्स्यादिति धूमवान् पर्वतो धूमवत्त्ववह्निमान् धूमध्वंसादिमान् समानकालीनत्वसंसर्गेण धूमविशिष्टवह्न्यादि
साधकानुमितौ धूमाजन्यत्वेन व्यभिचारतादवस्थ्यादुदन्तीत्युक्तं ननु धूमवान् पर्वतो वह्निमानालोकादित्यत्र धूम
समानकालीनवह्नेर्विधेयदशायां तदुपपन्नायां धूमसमानकालीनत्वेन विधेयतावच्छेदकीभूतवह्नित्वावच्छिन्नावगाहि
न्यामनुमितौ धूमाजन्यत्वाद्व्यभिचारः किं च विधेयतावच्छेदकतामात्रस्यातिप्रसंगत्वात् च विधेयतावच्छेदकत्वासं
तम्भवेनानुमित्यापत्तिरत आह उपधेयेति भेदान्मनोव्याप्यत्वस्य व्यभिचारवारकत्वादाह तद्वेति विशेषणत्वादिः प्रवे
39 शे च प्रतियोगिविशेषणेति ननु धूमकालीनः पर्वतो वह्निमानिति धूमादनुमितेर्लिङ्गकालीनत्वस्य हान्यत्वविरहाद
सिद्धिरित्यत आह तथा चेति तथा च यत्र तन्तुसमानकालत्वप्रकारान्यत्वे सति तत्र तत्समानकालीनत्वावगाहित्व
बुद्धिः स्यात्तद्धर्मजन्यत्वं स्यार्थः उपहितानुमितावपि वह्नौ यो धूमसमानकालत्वस्य स्तादजन्यत्वसत्त्वान्नासिद्धिः न चैवं
40 तीयस्य तत्र सत्त्वे पर्यं धूमाजन्यायां धूमकालीनः पर्वतो वह्निमानालोकादित्यादिस्थलीयानुमितौ व्यभिचारवार

कत्वात् नचैवमपि धूमकालीनवह्निसंयोगी पर्वतो वह्निमान् धूमादित्यादिस्थलीयानुमितावसिद्धितादवस्थ्यं तस्या अपि वह्नौ धूमका-
लीनत्वघटितज्ञाननिरूपितत्वादिति वाच्यं तद्वह्नित्वेन तस्यैव लिंगजन्यत्वस्यानुमितेव्यपत्वादिति भावः। ननु पक्षतावच्छेदकीभूतपर्वतत्वा-
दिसमानकालीनत्वेन साध्याभावज्ञानमनुमितौ पर्वतत्वाद्यन्यत्वाद्व्यभिचार इत्यत आह साध्यस्येति ननु गंधप्रागभावावच्छिन्नो
घटो गंधवान् घटत्वादित्यादिस्थलीयानुमितौ पक्षतावच्छेदकीभूतस्यापि गंधप्रागभावस्य समानकालीनत्वं गंधे भासत
एवमुक्तं च पक्षे तत्र संकीर्णगंधप्रदेशीनानुपपत्तेरतस्तत्रैव गंधप्रागभावनन्यायां व्यभिचार एवेत्यत आह नवीनेति गंधप्रा-
गभावो न तत्र पक्षतावच्छेदकः किंतु तत्कालत्वावच्छिन्नत्वमपि स्वरूपसंबंधात्मकमेव तत्रानुमितौ भासते ननु तत्कालव-
त्तितामात्रं येन चरमप्राक्स्यापामप्युक्तानुमितौ गंधप्रागभावनन्यायां व्यभिचार इति भावः पक्षतावच्छेदकावच्छिन्नसाध्यस्या-
नुमितौ भानेन चाचार्यसंमतमतो नवीनेत्युक्तं न च कालिकसंबंधेन धूमविशिष्टकालेतेनैव संबंधेन वह्नेः साध्यत्वे धूमवत्-
कालो वह्निमानेतत्कालत्वादित्यादिस्थलीयानुमितौ वह्नौ धूमसमानकालीनत्वावगाहिन्या धूमाजन्यत्वाद्व्यभिचार एवेति
वाच्यं वस्तुगत्या साध्यमवह्नेरेककालवृत्तित्वमानेप्युक्तानुमित्या एककालवृत्तित्वं धूमकालवृत्तितात्वरूपेण वह्नौ संसर्गम-
—र्यादया भासते धूमवान् पर्वतो वह्निमानित्याकारकानुमितौ धूमकालीनवह्निप्रसंयोगेनैव वह्नेः पर्वतांशे प्रकारत्वादिति
भावः कारणायेति जन्यपादं तु समानकालीनत्वेन नमनावगाहिनिरासमूहबोधे दंडजन्यघटाद्व्यभिचारः स्यादिति भावः तुल्ये

स्यादि एकधर्मिविशिष्टधर्मान्तरवैशिष्ट्यावगाहित्वाभाववत्त्वेनैव धर्मितावच्छेदकसमानकालीनतयाविधेयभावस्यानुभवि
कत्वादनुमत्याधिकत्वान्नैयदिनतादृशस्मृतौ व्यभिचारवारणायापि तादृशोपनीतभानस्य व्यभिचारवारणार्थमनुपनीतभानस्य द्वा
न्यत्वमपि हेतौ देयमित्यर्थः कुत्राप्युपमितेस्तादृशावगाहित्वाभावादिति रिक्तायास्तस्या अनन्वयात्तदन्यत्वं नोपात्तमिति
ध्येयं आधाने तिधूमलिङ्गिकायां धूमकालीनत्वावगाह्यनुमितौ धूमाजन्यत्वाद्युक्ताहेतौ व्यभिचार इत्यत आह तत्र प
इति आचार्याणां मत इत्यर्थः अतीतत्वाग्रह इति तथा हि अनुपस्थितधूमध्वंसादिलिङ्गिके वर्तमानानुमितिर्न विना तस्यां च धूम
कालीनत्वस्य कारणताभावादेव भानायोग्यत्वे निरुक्तहेत्वभावादेव न व्यभिचार इति भावः। नानुमितिरिति तत्समानका
लीनत्वग्रहाजन्यतत्समानकालीनत्वावगाह्यनुमितौ परामृश्यमानतत्त्वेन हेतुत्वादिति भावः अतीतलिङ्गिकायां तत्समका
नकालीनत्वावगाह्यनुमितौ व्यभिचारवारकं कस्यचिन्मतमाह केचन इति अत्र समानकालीनत्वेन तथा चातीतलिङ्गका
लीनलिङ्गत्वावगाह्यनुमितावतीतलिङ्गकस्य कालावगाहिन्यां वर्तमानकालावगाहन्यां निरुक्तहेत्वभावादेव न तत्र व्य
भिचारः ननु वर्तमानस्यैव कालस्य पक्षातीतलिङ्गाधिकरणतया भानेन तादृशानुमितौ न तथापि व्यभिचार एवेत्यत आह
तद्वैशिष्ट्यांशे चेति तयोर्लिङ्गवर्तमानकालयोर्वैशिष्ट्यांशे चेत्यर्थः फलितवर्तमानत्वं तद्वैशिष्ट्यांशे च भ्रमानुमितिषु मध्यापि तादा
60 त्म्यावगाहवर्तमानत्वेवेति न धीः वर्तमानपक्षधर्मसमानकालीनत्वावगाहिनी यातादृशी बुद्धिः साधर्मजन्येत्येव व्याप्ति

रिति भावः। तल्लिंगसमानकालीनत्वावगाह्यनुमितौ पराम्रश्यमानतालिंगत्वेन हेतुत्वात् लीनलिंगिकत्वादृशानुमितिरियास्ति
ऽप्यर्थे विशेषणमिति स्वरसः। कश्चिदिति सूचितः। मिश्रमास्त्यां परिष्कृत्याह केचित्त्विति। साधिनास्ततोपि साध्यविशेषणस्या
नुमितावहेतुत्वादाह विशिष्यावावच्छेदकमिति तु व्याप्यविशेष्यतानिरूपितावच्छेदकमित्यर्थस्तेन पर्वतो धूमकालीनवह्निमाना
लोकादिमानादिस्थलीयानुमितेः कालीनत्वांशे विशेष्यतावच्छेदकीभूतवह्नित्वाघटनत्वेपि न व्यभिचारः नतु पर्वतः
पर्वतत्वकालीनवह्निमान् धूमादित्यादिस्थलीयानुमितेर्विशेष्यतावच्छेदकीभूतपर्वतत्वाघटनत्वाद्व्यभिचार इत्यत आ
ह सतश्चेति वर्तमानस्येति नन्वेवं यावद्विशेष्यतावच्छेदकविशिष्टधर्मीनतावगाहस्तादृशबुद्धिः स्यात्तद्विशेष्यतावच्छेदक
जन्यत्वेव व्याप्तिरस्तु समानकालीनत्वप्रवेशो व्यर्थ इत्यत आह समानेति यतितादृशयावद्विशेष्यतावच्छेदकजन
न्यत्वं तस्य प्रयोजकत्वलाभायेत्यर्थस्तथा च तल्लोपादेयमेव हेतावितिभावः। अनुमितेः पक्षतावच्छेदकजन्यत्वं नाप्यसिं
मतमन्ययानुमितिविषयत्वाविशेषत्वे वर्तमानसाध्यतावच्छेदकादिजन्यत्वमपि तत्रस्यादिति विशेष्यतावच्छेदकत्वादि
प्रवेशोपि हेतौ व्यर्थः स्यात् यावत्वर्तमानपक्षादिविषयकत्वशाब्दबुद्धिः स्यात् तद्धर्मिजन्येत्यस्यैव सम्यक्त्वादित्यस्वरसः। केचि
दित्युक्तास्सूचितः पराम्रश्यमानत्वेनेति फले प्रतिपक्षरूपेणाकारणत्वं स्वापारं प्रस्यापितद्रूपेणैव कारणस्य हेतुत्वादिति भा
वः। रूपान्तरेण विषयत्वादिरूपेण तद्रूपेणेति पराम्रश्यमानलिंगत्वेनेत्यर्थः। फलव्यापारयोरेकरूपेण कारणस्य

41

हेतुत्वमुपपादयितुमितमाह लिंगत्वेनैवेति व्यापारमात्रमितिमात्रपदेन करणतावच्छेदकत्वव्युदासः कश्चिदित्यस्वरसस्ताद्वी
जेनुपरामर्शव्याप्यपि न लिंगत्वेन हेतुत्वं सामान्यतः प्रसिद्धेविषयत्वेन तद्व्यक्तिगोचरप्रसिद्धेतत्तद्व्यक्तित्वेन वा हेतु त्वात्तादृश्येन
वन्नानुमितौ हेतुत्वं व्यभिचारादिप्येकरूपेण फलव्यापारो प्रतिहेतुत्वसंभवादित्यपि विसादि विनिगमनेति लिंगपरामर्शत्वे
नैव परामृश्यमाणलिंगत्वेनादि हेतुतायां विनिगमकाभावो लिंगपरामर्शविषयतया विशेषणत्वं वा लिंगस्यानुमितिहेतुता
यां बीजं तच्च व्याप्यमानेन संभवतीति प्रमाणाभावादेव न तस्यानुमितिहेतुत्वमिति भावः न चेति व्याप्यमित्यस्य च यः विशि
ष्टस्य लिंगविशिष्टपरामर्शस्य लिंगत्वेनेति तस्यैव परामर्शविशेषणतावच्छेदकत्वादिति भावः व्याप्यत्वादीत्यादिना पक्षत्व
निवेशपरिग्रहः वस्तुमात्रस्यैवेति परामर्शविषयतावच्छेदकस्याभावत्वाधिकरणत्वादेः केवलान्वयित्वादिति भावः इदं वस्तु
मात्रस्यानुमितिहेतुत्वं न पितिपरामर्शविषयतावच्छेदकीभूतेनाभावत्वादिनानुमितौ स्यात्तत्रान्वयव्यतिरेकानुविधानाभावा
दिति भावः। ननु विनापि स्यात्तत्रान्वयव्यतिरेकानुविधानं लिंगविशिष्टपरामर्शहेतुत्वमेव ततद्विशेषणतावच्छेदकीभूतेनाभाव
त्वादिनानुमितिहेतुत्वं कल्पयितुमशक्यमत आह अन्यथेति इष्टाद्यामिष्टसाधनताघटकस्य शाब्दबोधादौ चाकांक्षादिघट
कस्य जगत एव विशिष्टस्य इष्टसाधनत्वादिज्ञानस्य हेतुतावलादिवतद्विशेषणतावच्छेदकीभूतेनाभावत्वादिना हेतुता
पत्तेरित्यर्थः। ननु लिंगपरामर्शस्थले इव तत्रापि विनिगमनाविरहादिष्टसाधनत्वानि विष्टपदार्थस्यैव आदि हेतुत्वमेवेत्यत आ

हेतावेतिव्याप्तीति व्याप्तिप्रकारकपक्षधर्मताज्ञानविषयत्वेनेत्यर्थः तादृशज्ञानत्वेन व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन तद्वि
षयत्वस्यापि प्रवेशो गौरवादिति भावः। ननु पक्षनिष्ठविशेष्यतानिरूपितव्याप्यवत्त्वप्रकारतासंबंधेन ज्ञानविशिष्टत्वेन
हेतुत्वाद्विनिगमनाविरहः स्वप्रमेयत्वादिप्रकारकज्ञानस्य तादृशसंबंधेन हेतावभावादिति गासिद्धसंग्रहाभावादत आह किं चेति का
लोत्तरीयं यद्व्याप्तिविशिष्टपक्षधर्मताज्ञानं तद्विषयीभूतादपि लिंगादित्यर्थः ननु कारणतावच्छेदकधर्मावच्छिन्नपूर्ववर्तित्वस्य कार्यो
त्पत्तौ तंत्रत्वात्तदानीं च तादृशज्ञानविषयतापन्नस्य लिंगस्याभावान्नानुमितिरिति भावः। तत आह। कारणेति मुक्तावली। मुप
लक्षितेतद्विशिष्टेति कारणतावच्छेदकविशिष्टसत्त्वस्येत्यर्थः कार्योत्पत्तिनियामकत्वमिति विपरिणतेनान्वयः गौरवादिति दं
डादिसत्त्वेपि सत्यां दंडत्वादिविशिष्टसत्त्वस्य घटानुत्पत्तिनियामकत्वे गौरवादित्यर्थः स्वरूपसंबंधात्मनो नियामकत्वस्य का
धकेविनाप्युपपत्तेर्विश्रामादिति भावः। इतोपि चेति कारणतावच्छेदकोपलक्षितपूर्ववर्तित्वस्यैव कार्योपधाने तंत्रत्वादित्यर्थः।
अन्यथा मण्यादिसत्त्वदशायां मण्यभावविशिष्टवह्नित्वावच्छिन्नस्यासत्त्वाद्दाहानुत्पत्तिसंभवान्मण्यभावत्वेन दाहा
दिहेतुत्वेन स्यादिति भावः। इतोपीत्यपि कार्यान्मण्यभावविशिष्टवह्नित्वेनैव विनिगमनाविरहात् वह्निविशिष्टमण्यभावत्वेना
पि गुरुधर्मेण हेतुतापत्तिरतो वह्नित्वमण्यभावत्वाभ्यां लघुधर्माभ्यामेव दाहादिहेतुत्वात् प्रतिबंधकाभावस्य कारणतानव
च्छेदकत्वमिति संविदितं प्रतिबंधकाभावादीनामपि निमित्तकारणत्वं तस्योपग्रहः तेन घटादिकार्यसमवायित्वाद्यनुपपत्त्या

क्षणघटादिहेतुताकस्य कपालादिने दंडादिविशिष्टकपालत्वादिना घटादिहेतुत्वं पूर्वं दंडाद्युपलक्षिततायापि तन्निगमकदशायां केवलक
पालात् घटापत्तेरिति भावः । ननु दंडघटादिस्थले कारणतावच्छेदकावलीढकारणसत्त्वस्यैव कार्योत्पादनियामकत्वेऽतिप्रसं
गाभावात् तत्र विशिष्टसत्त्वस्य तथात्वमस्त्वत आह केचित्तु कार्यान्तरीयपरामर्शविषयादपि लिंगादनुमित्यापत्त्या परामर्शविशिष्टस
त्त्वमेव नियामकं वाच्यमत आह परामर्शविशिष्टेति अत्रानुमितौ लाघवादिति विशिष्टसत्त्वस्य प्रयोजकत्वापेक्षया विशेषण
सत्त्वस्य प्रयोजकत्वे लाघवादित्यर्थः । ननु लघुनोऽपि विशेषणसत्त्वस्य प्रयोजकत्वं व्यभिचारादत आह आवश्यकत्वादिति विशि
ष्टसत्त्वस्थले विशेषणसत्त्वस्यावश्यकत्वादित्यर्थः । तथा च व्यभिचारित्वं तत्राप्यनुमतमिति भावः । तथात्वे अनुमितिहेतुत्वं
पक्षसत्त्वं कार्योत्पत्तिनियामकं तस्यैव कारणत्वादिति भावः । ननु चेति परामर्शत्वावच्छिन्नस्यैवानुमितिहेतुत्वे ज्ञलभागाह प
रामर्शधर्मिकाप्रामाण्यज्ञानाभावस्य च प्रयोजकत्वानुमितिहेतुत्वात्तेन पूर्वं कारणतावच्छेदकागृहीताप्रामाण्यकादपि प्रमात्वेन गृह्य
माणपरामर्शादनुमितिरिति भावः । अथैवमिति एवकारेणावच्छेदकावलीढस्य पूर्वसत्त्वापेक्षणे इदमेवेति संग्रहं च चक्षु
ष्ट्वादिना चाक्षुषत्वादिकं प्रति हेतुत्वे कालान्तरे विषयसंयुक्तादपि चक्षुरादितस्तन्निगमकदशायां प्रत्यक्षोत्पादादित्येवं च चक्षुः
संयोगत्वेन हेतुतायां विनिगमकं स्यात्तथा च चक्षुरादिसंयोगत्वेनैव चक्षुष्ट्वादिनापि विनिगमनाविरहाच्चाक्षुषादिहेतु
त्वमिति प्रकृतोऽभिप्राय इत्यर्थः । संयोगाश्रयोरित्यादिपदेन घटादिकं प्रति कपालतन्तुसंयोगयोः परिग्रहः । विनिगमनाविरहेण चे

चक्षुरादेः कारणत्वसाधकः किंत्वन्वयाद्यनुविधानमेव तस्मिन्नेवाह स्यादेवेत्यादि ननु चक्षुःसंयोगाद्यनुविधानेऽपि स्वीकार्यमे
व चक्षुरादेरन्वयाद्यनुविधानं न तु स्यात् तथा च चक्षुर्नाशकालेऽपि चक्षुःसंयोगसत्त्वे प्रत्यक्षोत्पादे सति विरहादत आह स्या
देवेति तथा च चक्षुरादिसंयोगस्य प्रत्यक्षहेतुत्वेऽपि चक्षुरादेस्तत्र हेतुत्वं व्यापारेण व्यापारिणोऽन्यथासिद्धत्वाभावाद्धेतुत्वमनुव्या
नुपपत्त्या प्रत्यक्षत्वं प्रति चक्षुरादिना प्रत्यक्षत्वावच्छिन्नं प्रति व्यभिचारादिना विलक्षणविदितादिति भावः ननु चैवं कार्यस्यैव चक्षुरा
देरिवानुमितावपि लिंगस्य स्वतंत्रान्वयव्यभिचारिकाभ्यामेव हेतुत्वमापाद्यत इत्यत आह नचेति धूमाभावे सत्त्वेऽपि वह्नि
कानुमित्युत्पादाद्व्यभिचारादनुमितिमात्रे लिंगस्य न स्वतंत्रान्वयव्यतिरेकाविति भावः नचैवं नित्यलिंगकानुमितिप्रत्यक्षा
त्पादकत्वमनुमानलिंगस्य हेतुत्वमन्वयाद्यनुविधानसत्त्वादत आह नचेति तस्य लिंगस्य तथा च यथा कोऽपि लिंगस्य मन
त्वादिः परामर्शव्यापारः स्यात्तदा तेन व्यापारेणान्यथासिद्धिसंभवात्तादृशलिंगस्यानुमितिहेतुत्वं स्यान्नचैवं लौकिकप्रत्य
क्षस्येव विषयजन्यत्वादतः परामर्शेनैवान्यथासिद्धिं तन्नापि लिंगं न हेतुरिति भावः ननु कार्योत्पत्तिनियामकत्वं न स्वरूपसंबंधः
किंतु व्यापकत्वं तच्च लिंगपरामर्शसत्त्वस्येव गुरोरपि परामर्शविशिष्टलिंगसत्त्वस्यापीति मतः कप्तकालावच्छेदकविशिष्टसत्त्वस्यै
व कार्योत्पत्तिनियामकत्वस्वीकारेण कालोऽनुदीय परामर्शविषयालिंगादनुमित्युत्पत्तिकारणतालिंगपरामर्शत्वेनैव परामर्श
मात्रलिंगत्वेनापि हेतुता कं वा स्वतो गोविनिगमनाविरह एवेत्यत आह ननु नवाप्येकस्य पुंसः परामर्शादन्यस्यानुमित्यापत्तेः

पुरुषीयानुमितिहेतुत्वात् कार्यकारणभावानैयमिति बोध्यम् आहुरित्यादि इत्यादिसमसुत्तानादिमानां यथासंख्यं हेतुतयान्वयः
43 एकार्थ इति यदा यत्रानुमितिस्तत्तद्भाकृत्वे साधनेन समर्थं इत्येवं व्याप्यकालाद्यवच्छिन्नायां कार्यकारणयोः समानाधिकरणे संबंध
विधया विवक्षितः इति यत्र कारणतावच्छिन्नसंबंधेन कारणं तत्रैव तत्र कार्यतावच्छेदकसंबंधेन कार्योत्पादकत्वान्नैकस्य पुंसः परा
मर्शदशायां मया परस्यानुमित्यापत्तिरित्यर्थः साध्यवत्त्वमिति अभेदस्य केवलान्वयिसाध्यके ऽप्रसिद्धत्वाद्व्यतिरेकिसाध्यके चाप्रसि
द्धस्यापि साध्याप्रसिद्धस्य तस्या सर्वत्रानुमितौ वर्तमानत्वायोगाद्धेतुत्वं तदंशे दर्शयति एकेति एकाधिकरणाभावविशिष्टोपि परेषाम
भोगाभावास्तादादिरित्यर्थः तथा च भाविन्यापि पर्वते धूमान्वित्वस्यति घटादावन्यत्वमेव विद्यमानमिति गंधत्वादिः साध्यकं संभव
तीति भावः आदिना द्रव्यत्वाद्यन्तताभावविशिष्टस्य घटत्वाद्यन्तं ताभावस्योपग्रहः ननु वर्तमानस्य धूमप्रागभावादेर्हेतुत्वे
तत्कालीनत्वे तत्र साध्यानुमानापत्तेस्तस्य लिंगत्वाभिधानमसंगतमत आह तस्यैवेति विरोधीति यत्र धूमप्रागभावस्तत्र
धूमप्रागभावानधिकरणकालावच्छेदेन वह्निरित्येवं क्रमेण व्याप्तिग्रहादित्यर्थः तुल्यत्वादिति साध्यनियमस्य तत्समानका
धिकरणस्य च दूषितं वप्रागभावसत्वादिति भावः शंकते धूमप्रागभावत्वमिति किं वा इति प्रागभावत्वस्य व्याप्यतावच्छे
दकत्वे प्रागभावे व्याप्तिपक्षधर्मत्वयोः परामर्शसंभवादिति भावः वस्तुगतिमनुरुध्याह नचैतदपीति धूमप्रागभावत्वादे
र्व्याप्यतावच्छेदकत्वमपि नेत्यर्थः तस्यैवेति धूमप्रागभावत्वस्यैवावच्छेदकत्वादित्यर्थः अन्यथा व्याप्तिरवच्छेद्यत्वनियमे प्रति

योगितत्त्वादीत्यादिना तादृशप्रतियोगितावच्छेदकत्वस्यानुपग्रहः। तच्चेति यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितत्वाय
वच्छिन्नाभावो व्यापकत्वं तत्र च विशेषणीभूतधर्मो व्याप्यतावच्छेदक इत्यर्थः। प्रतियोगितत्त्वादिकमेवेति प्रतियोगितावच्छेदकमिति
पूर्वेणान्वयः। यद्यप्यव्याप्यवृत्तिवह्निसंयोगादेर्धूमादिव्यापकत्वोपपत्तये स्वानधिकरणहेतुमन्निष्ठाभावप्रतियोगितात्वा
यभावकूटवत्त्वमेव व्यापकत्वं स्वत्वस्याननुगतत्वेन तत्तदभावाभावस्यासंभवात् तथा धूमप्रागभावत्वस्य हेतुत्वेऽपि सुवचं
तथापि व्याप्यवृत्तिसाध्यकव्याप्तिस्थलाभिप्रायेणेदं तत्र प्रतियोगिवैयधिकरण्याप्रवेशाल्लाघवमिति ध्येयं लाघवादिति प्राग
भावाप्रवेशाल्लाघवादित्यर्थः। एवं चेति धूमप्रागभावव्यापकत्वाप्रसिद्धेरेव स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरसं
संभवादिति भावः। तत्त्वे धूमप्रागभाववत्त्वं अत एवेति धूमवन्निष्ठाभावप्रतियोगित्वस्यापि तथा प्रमेयधूमवन्निष्ठाभाव
प्रतियोगित्वादेर्गुरुतया तदवच्छिन्नाभावाप्रसिद्धेः प्रमेयधूमत्वादिकं न व्याप्यतावच्छेदकमित्यर्थः। एकजातिव्याप्यस्या
परजातिव्यापकस्य यद्रूपादेस्तत्र क्रमेण व्याप्यत्वाद्युदासस्यासंभवात् समनियतेऽस्तु सुखे गुणत्वादौ जातिमत्त्वादिपदेन वह्नित्वा
दिसमनियतस्येन्द्रियत्वजलत्वादिकर्मणः परिग्रहः। तथा च व्यंसत्वासत्त्वात् स्नेहासमवायिजलत्वादेस्तादात्म्यादिकं साध्यं व्या
प्यं न स्यादिति भावः। व्याप्यत्वाभावेऽप्युत्पादप्रतिलाघवेनेत्यादिजलादीत्यादिनावच्छेदकस्यानुपग्रहः। अवच्छेदकत्वात् व्याप
कताप्रतियोगितावच्छेदकत्वात् स्नेहादीत्यादिना द्रव्यजलत्वानुपग्रहः। प्रसिद्धं चेति गन्निष्ठाभावप्रतियोगित्वस्यापि

न्तायोगित्वविशिष्टवन्निष्ठाभावप्रतियोगित्वत्वादेर्गुरुतया तदवच्छिन्नाभावाप्रसिद्ध्या उभयंगोत्वादिसाधेयोगित्वत्वादिकमपि
व्याप्यतावच्छेदकं नस्यादित्यर्थः। स्वयं नीलधूमत्वस्य व्याप्यतावच्छेदकत्वोपगमादाह तेइति अतिरिक्तत्वादिति तस्य नीलधूमादा
वपि सत्वेन धूमवन्निष्ठाभावप्रतियोगित्वत्वापवच्छिन्नाभावत्वातिरिक्तत्वादित्यर्थः। तथा च लोके क्रमेण नीलधूमत्वेनैव
वसंभवादिति भावः। ननु प्रमेयधूमत्वादित्वेन च व्याप्यव्यापकत्ववत् त्वापैगुरोरपि प्रमेयधूमत्वादेरपि यथा प्रतियो
गितावच्छेदकत्वं स्वीकृतं तथा स्वनिहत्वादिप्रकारेण व्याप्यत्ववत् त्वार्थमपि स्वनिहवन्निष्ठाभावप्रतियोगित्वत्वादेस्तत्पात्वं
स्वीकार्यमतः स्नेहादौ न व्याप्यत्वमतआह प्रमेयधूमत्वादिनेति कुतइति तस्य धूमप्रागभावत्वनीलधूमत्वादेः कुतो व्या
प्यतावच्छेदकत्वमुदासः। धूमप्रागभावादिमन्निष्ठाभावप्रतियोगित्वत्वादेरपि गुरोः प्रतियोगितावच्छेदकत्वसंभवादि
ति भावः। ननु पतत्सामान्यं इत्यादिन्यायेनानुमितिसामान्यहेतोः परामर्शस्यैव प्रमापरामर्शत्वेन प्रमानुमितौ विशेष्य—
45 हेतुत्वोपगमान्लिंगस्य तत्र कारणत्वखंडनात् पुनस्तादाशंकनं संदर्भ विरुद्धमतोभावमाह तत्रैवेति नगौरवमिति तथा च
लिंगत्वाघेनागुरुत्वादिवयथार्थलिंगपरामर्शत्वेन प्रमानुमितौ न हेतुत्वसंभवइति भावः। अन्यथापीति सामान्यतः कृ
तत्वादिव विशेषतः कारणत्वे कार्यसामान्यहेतोः कालादेरनुमित्यादिकं प्रतिपरामर्शादिविशिष्टकालत्वादिना हेतुत्वा
पत्त्या परामर्शादिकमप्यनुमितौ हेतुर्नस्यादित्यर्थः। ननु पदार्थत्वेनादिव्याप्येसामान्यतः कालनिवेशात् कथं धूमकालीन

त्वेन वह्नेः सिद्धिरत आह सामानाधिकरण्य इति नियतेत्यादि तथा च यत्र धूमस्तत्र धूमकालीनसंयोगेन वह्निरिति व्याप्तौ धूम
कालीनवह्निसंयोगेन तस्याश्रयस्य वह्नेः उक्ताहेत्वात्तादृशसंबंधेन पर्वतो वह्निमानित्यनुमितिः संबंधविधयैव धूमकालीन
संबंधेन व्याप्त्यात्तु निरुक्तसंबंधेन वह्नेः साध्यतावच्छेदकत्वमेव यदा तदेदमुभयोर्मूलेऽभिधानादिति भावः। मतांतरं दूषय
ति यदेत्यत्रेत्यादि यदा धूमस्तदा वह्निर्यत्र धूमस्तत्र वह्निरित्येवं व्याप्तिद्वयज्ञानाज्जायमानायां पर्वतो धूमकालवान्व
ह्निमानित्यनुमितौ लाघवाद्विशेषणतया पर्वते धूमकालविशेषक एव वह्निर्भासत इत्यर्थः वस्तुगत्या धूमकालीनस्यैव वह्नेः प
र्वते भानेऽपि तस्य धूमकालीनत्वेन वह्निभानस्यासंपादनादुक्तं तीयुक्तं यद्वा लाघवादेकोपस्थितेयद्येकस्याः सिद्धा
वपि धूमकालीनत्वेन वह्नेः सिद्ध्ययोग्यतावच्छेदकत्वतिका वादीत्यादिनाद्दशोपग्रहः एतावतापि व्याप्तिसंमतं धूमादि
दिकालव्याप्तेन यद्यापि यावग्राहित्वं नानुमितेः संपादितं धूमकालस्य यदा तावच्छेदकत्वेतद्वत्त्वे च तस्यैवानुमितौ भा
नसंभवात्तस्माद्धूमकालीनवह्निधीर्यावत्तादृशयामिवधूमसमानकालीनत्वेन व्याप्यानुमानं तु दृश्यमिति न
व्याः तदसंभवो व्याप्तिज्ञानस्य करणत्वासंभवः। ननु फलोपजनकस्य तदीयव्यापारजनकस्य संस्कारादेः कथं तद्व्या
पारीभूतपरामर्शजनकत्वमत आह फलजनकेति विरोधाभावादिति यथा यज्ञजनकस्यापि कपालादिकर्मणस्तद्व्या
पारीभूते कपालद्वयसंयोगादिजनकत्वाद्रूपव्यापारे व्यभिचारित्वादिति भावः नचेति वाच्यमित्यन्वयः नकरणत्वं नानु

मितिकरणत्वं तथा च व्यापारजनकतावच्छेदकरूपेण फलजनकस्यैव करणत्वात्तु स्मारणाल्लिङ्गपरामर्शजनकतावच्छेदके
न व्याप्यवत्तानिश्चयत्वेन नानुमितिं प्रति करणत्वाननुस्मृत्या लिङ्गपरामर्शस्थले व्याप्तिविशिष्टानुभवस्यानुमितिकरणत्वा
सम्भव इति भावः। ननु व्यापारीभूतस्मरणाल्लिङ्गपरामर्शस्य व्याप्तिविशिष्टबुद्धित्वात्तज्जनकतावच्छेदकीभूतेन व्याप्तिविशि
ष्टत्वेनैवानुमितिकरणत्वाविरोध इत्याशङ्क्याह व्याप्तिज्ञानत्वेन चेति। ज्ञानोपरमेऽपि व्याप्तिविशिष्टविषयोपधानेन
इत्याशयः। स्मरणानुकारणत्वं व्याप्तिविषयकत्वेनैव व्याप्तिविशिष्टज्ञाने प्रतिहेतुत्वात् न त्वनुमितौ व्यापितावद्रूपेणैव कर
४५ णत्वमित्यपि तु विशेषकत्वादिति भावः। करणजन्यतावच्छेदकरूपेण फलजनकस्यैव व्यापारत्वात् पूर्वोक्तपक्षे व्याप्ति
विशिष्टानुभवजन्यतावच्छेदकेन च व्याप्तिविशिष्टस्मृतित्वेनानुमित्यजनकत्वात् स्मरणाल्लिङ्गपरामर्शस्य न व्याप्ति
विशिष्टानुभवव्यापारत्वसम्भव इत्याशयेनाह नवेति उक्तनियमयोरप्रयोजकत्वमभिप्रेत्य दूषयति व्याप्तिविषयकस्मा
दिष्टकधर्मिकव्याप्तिज्ञानादन्यधर्मिकव्याप्तिस्मरणानुपपत्त्या धर्मिनिवेशस्यावश्यकत्वे व्याप्तिज्ञानत्वव्याप्तिस्मृतित्वयोरस्मा
मान्यतः कार्यकारणभावे मानाभावादाह विशिष्टविषयकेति धूमादिधर्मिकव्याप्त्यादिविशिष्टज्ञानत्वतद्धर्मिकव्याप्त्या
दिस्मृतित्वाभ्यां वा इत्यर्थः। व्यापारेति स्मरणाल्लिङ्गपरामर्शोत्पत्तौ जनकव्याप्यवत्तानुभवयोरनुमितौ व्यापारव्यापारिभावे
विरोधाभावादित्यर्थः। अप्रयोजकत्वस्य दूषयति नहीति तयोः व्यापारव्यापारिणोः ननूक्तनियमे बाधकाभावे एवमानम

तत्राह इंद्रियेति चक्षुःसंयोगव्यापारकव्यापारं प्रति हेतुत्वे न हि तु भूतस्य चक्षुरादेः स्वजनकतावच्छेदकीभूत चक्षुस्त्वादिना चाक्षु
षात्मकफलं प्रति करणत्वात्तु संयोगत्वेन चक्षुरादिकरणजनकस्य चक्षुःसंयोगादेः स्वजन्यतावच्छेदकीभूतेन चक्षुःसंयोगत्वा
दिना चाक्षुषाद्यात्मकफलं प्रति व्यापारत्वात्तु एवं पदार्थोपस्थिति स्मारकव्यापारं प्रति संबंधिज्ञानत्वेन हेतोः पदज्ञानस्य तज्ज
नकतावच्छेदकीभूत पदज्ञानत्वेन शाब्दात्मकफलं प्रति करणत्वात् संबंधिस्मृतित्वेन पदज्ञानात्मककरणजन्यस्य पदार्थोप
स्थितेस्तज्जन्यतावच्छेदकीभूत पदजन्यपदार्थोपस्थितित्वेन शाब्दात्मकफलं प्रति व्यापारत्वात्तु क्रमात्तौ व्यभिचारेण बाधक
इत्यर्थः एवं तु क्रमनियमात्मत्वेनातद्धर्मेति तत्तरोत्तर विशेषणत्वाभीप्सितेत्यर्थः अस्माकं तु प्रथमधीजन्यतावच्छेदकेन विशिष्टत्वान
त्वेन द्वितीयक्षणोत्पत्ति मध्यमस्याहि तु तस्मात्त्र व्यापारत्वमिति व्यापारविरहादेव नत्रयमस्य तृतीयकरणत्वमिति भा
वः । यमिति यद्धर्मावच्छिन्नजनकत्वेन यद्धर्मावच्छिन्नस्य फलतावच्छेदकीभूत यद्धर्मावच्छिन्नोत्पादकत्वं तद्धर्मावच्छिन्नस्यैव ता
दृशफले तद्वच्छिन्नस्य व्यापारत्वादित्यर्थः तेन प्रथमक्षणोत्पन्नकस्य द्वितीयक्षणोत्पन्नत्वेन तृतीयक्षणोत्पादकेऽपि न क्षतिः न
चैवं मनःसंयोगस्यापि ज्ञानसामान्ये आत्ममनोयोगस्य कारणजन्यत्वात्स्मृतादिहेतुत्वादिति भावः । तत्पदानियमेति व्यापार
जनकतावच्छेदकरूपेण फलजनकस्यैव करणत्वं करणजन्यतावच्छेदकरूपेण फलजनकस्यैव व्यापारत्वमिति स्वयं नियम
मेवेत्यर्थः विशिष्टेति व्यापारवत्त्वाप्रयोज्यत्वादृष्टसंबंधिविशिष्टवृत्तिसामान्यप्रत्यक्षं तस्मात्सामान्यप्रत्यक्षतस्मैवधेन

विशेषणज्ञानत्वेन हेतुत्वमभिप्रेत्याह पूर्वानुभवेनेति संस्कारादिसाधारण्येन विषयकत्वेनैव समनन्तरपक्षं वधेन ताप गाद्विशिष्टधी
हेतुत्वमभिप्रेत्याह संस्कारेणेति जनकतादितितया वत्सारणां लक्षणया मर्शस्यलेपि व्याप्यायत्र जनकतावच्छेदकेन व्याप्तिविषयकत्वे
न पूर्वानुभवस्यानुमितिसामान्यजनकत्वात्तस्य कारणत्वहानिः नन्विदं व्याप्तिज्ञानत्वेन कारणतानस्यादत आह व्याप्ति विष
यकत्वेनैवेति तथा च तत्रैव व्याप्तिरत आह तत्रैवेति भावः एतावतापि कारणजन्यतावच्छेदकस्य पेणा फलजनकस्यैव व्याप्यत्व
नियमेनोपपादितत्वाशयेनाह तत्रैव साध्यव्याप्तिविशिष्टबुद्धित्वस्य नियतवृत्तित्वेन कार्यतावच्छेदकत्वात् जन्यत्वविशिष्टेनैसुतो
अनुमितिजनकतावच्छेदकीभूतस्य निश्चयत्वस्याप्रवेशांशो इत्यत आह संशयसाधारणेति तज्जन्यत्वात् विशेषणीभूता व्याप्ति
विषयकधीजन्यत्वात् कारणजन्यतावच्छेदकीभूतस्य जन्यव्याप्तिविशिष्टज्ञानत्वस्याप्रवेशं सूचयितुमाह नियमतो धारणे
तिरगतत्वापि कारणत्वनिरूपकत्वस्य लाघवादित्यादि व्याप्तिः संशयादपि स्वत्काभ्यांशानिश्चयवतोपि परस्य हेतुतया वृत्तेरनुमिस
नुत्पत्तेरिति भावः लाघवात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शस्यैव स्वमतेनुमितिहेतुत्वात् यदि चेत्युक्तेनियतेति पर
मर्शपूर्वनियतोपस्थितस्याभावव्याप्तिरेवेति न मे वक्तारणामिसर्गः भिन्नमते निरासयितुमाह यत्त्विति अन्यथासिद्धादिकलाद
र्शपूर्ववर्तित्वं गृहीत्वा फलजनकत्वग्रहे तादृशपरामर्शस्य परामर्शत्वादिरूपर्थः तत्रैव न्यथासिद्धो व्याप्तिविशानीदं तथा
च परामर्शस्यानुमितिलक्षणकार्यानुगुणतया तेन पूर्ववर्तित्वग्रहे पानुमितौ न तादृशपरामर्शस्यान्यथासिद्धिरिति भावः एवं फलान

गुरुत्वं श्रयतीत्यस्यानिविष्टत्वात् इत्यादि तर्हि किं दंडस्य घटजनकत्वं निरवच्छिन्नमेव तथात्वे चातिप्रसंगात् इत्यत आह दंडत्वेनैवेति
नचैवं भ्रमिजनकादपि दंडात् घटोत्पत्तिः स्यादत आह क्वचिदिति ननु भ्रमेरपि स्वांतर्गतहेतुत्वमपेक्ष्य दंडस्येव भ्रमिजनकदंडत्वे
न घटहेतुत्वं नावच्छेदकमुचितमत आह क्वचिदिति समवायादिसंबंधेन कारणतावच्छेदकीभूतभ्रमिजनकत्वसमवायचक्रत्वादिना वच्छेद्यस्युप
धायकत्वस्य सूचनं तदुपधानेन कतापाद् इति भ्रम्यभावप्रयोजककताघात् इत्यर्थः ननूपधायकतासंबंधेन विशिष्टत्वेनैव घटहेतुत्वात् का
रणतावच्छेदक पूर्वसत्त्वस्यापि चकारोक्त्या पादादवच्छिन्नकत्वात् भ्रमिः स्यात् अत नहेतुत्वं तावच्छेदकमत आह भ्रमिविशिष्टत्वेनेति चक्रा
दीनामिति तेषामपि भ्रम्युपधायकत्वस्वरूपेणैव घटहेतुत्वसंभवे च क्रत्वादिना हेतुत्वे नस्यादित्यर्थः ननु चक्रत्वादिनान्वयप
नुविधानादित्यत्रास्तु कपालत्वं हेतुत्वं तावच्छेदकमत आह नस्यादेवेति निस्कंपेसु पलदलाणां घटादौ प्रवृत्तिसामान्यं व्यपि वयघटजनकतावच्छेद
कधर्मी न कता स्वरूपयोग्यतानिश्चयस्यापि संगीकृत्वात् फलोपधायकता संदेहस्य लाघव गृह्यतोसकंपत्ववृत्तेरुपतापादि
तिध्येयं । ननु स्वरूपत्वयोग्यत्वपादाणत्वादिभिः कपालदंडत्वजातीय घटहेतुत्वात् लेभवत्पदि घटजनकतावच्छेदकता तासिद्धं
सर्वत्वादि व्यापकमेव दंडत्वं सुवर्णादंडत्वादिभिश्च घटानुत्पादे भ्रमिरूपव्यापारविरहादेव स्यादेतेन दानान्तादिधान्त
मेव दंडानां इत्यत्रापि मूर्त्तत्वेन वा घटहेतुत्वसंभवात् दंडत्वजातेर्मानाभावो गगनमनः प्रभृतिभ्यो घटानुत्पादस्यापि भ्रम्याद्य
कस्माद्व्यापारविरहादेव वक्तुं शक्यत्वादत आह अस्त्वेवेति अवच्छेदकविशेषेण कठिनसंस्थानवत्त्वं वेगविशेषादपि वक्तुमशक्यमे

रूपत्तेः। किंतु चक्रभ्रमिप्रयोजकतया सिद्धवेगात्संतानस्थितिस्थितिस्थापकसंस्कारत्वमेव तथात्वं न च घटपरंपरासंबंधेन तादृशसंस्का
रवत्त्वस्य कारणतावच्छेदकत्वमपेक्ष्यतामन्यथा द्विलक्षणसंयोगत्वं वक्तव्यं तथा च एव समवायेन जनकतावच्छेदकत्वमुचितं अत एव संस्का
रजनवेगात्स्वस्य कर्मजन्यत्वादभिरभिघातत्वादभिजीसंयोगकर्मणाशिक्षावधिनाशानतिरिक्तस्य शरीरजन्यत्वाहआदित्यादिस्तितनघाचघटजनक
तावच्छेदकः प्रथमभ्रमिभ्रमिजनकत्वस्य तज्जनकतावच्छेदकवेगाद्यधीनत्वनियमादिति भावः। ननु द्वित्रिसंचलिते
रेचवैश्रमकभ्रमिरुत्पद्यते। तेषामेकतमादपि चक्रभ्रमिर्यस्य वोत्पत्तिप्रसंगस्तादीपेक्षकत्वे संस्कारेणाभ्रमिप्रयोजक
वेगात्प्रसत्त्वादिति वाच्यं अस्खलितनरकोऽसंयोगव्यक्तीनामपि वाम्यादिजातिविशेषकत्वकल्पनादिति भावः। यच्चन्यथासिद्धि
निरूपके स्यापि भ्रमिजनकत्वेन घटहेतुत्वं तदा भ्रमिहेतुत्वमपि घटजनकत्वस्योपेतो नास्यातथान्योन्याश्रयापत्तिरिति
निर्भेस्याह अन्यथेति अत एव स्वस्यस्वर्णत्वकारकत्वादिभिर्भ्रमोकर्षादिति भावः। चैतन्यादीत्यादिना मार्दमाकापादिउ
पग्रहः। ननु भ्रमेः फलानुगुणतया तज्जनकत्वेन घटहेतुत्वेऽपि घटस्य भ्रमानंतरनुगुणतया जनकेन भ्रमिहेतुतायामन्य
थासिद्धिरिव व्याधिक्यमत आह किंचेति परामर्शजनकत्वेन व्याप्त्यादिज्ञानस्यानुमितिहेतुत्वे शाब्दबोधानामितिहेतुत्वप्रसं
गइत्यर्थः। नयः एवमग्रेऽपि तज्जनकेतिराद्यधीनजनकं पदार्थोपस्थित्यादिज्ञानेन जनकत्वेनेत्यर्थः। नन्वित्ययमेनेतिस्वाकारा
दिनिर्विशेषविशिष्टस्य ज्ञानादीनामित्यर्थः। कार्यांतरं घटादि तथा च घटादिजनकोऽपः कपालादिजनकत्वेन कपालिकादौ

नामविघटादिजनकत्वप्रसंगइत्यर्थः। शंकते तज्जनकत्वेनेति आकांक्षाज्ञानादिजनकत्वेन शाब्दादिबोधं हेतुत्वे आकांक्षादिज्ञान
त्वेनैव शाब्दादिहेतुत्वं युक्तमित्यर्थः। वस्तुतो व्यभिचारेण प्रथमोपस्थितत्वस्य वक्तव्यत्वात्पकत्वो नियतत्वादाह आवश्यकत्वादि
तिआकांक्षाज्ञानानां युगपदुपस्थितिदशायां शाब्दबोधानुपपत्त्या शाब्दबोधादिकं प्रत्याकांक्षाज्ञानत्वादिना हेतुत्वस्यावश्यकत्वा
द्वित्यर्थः। ननु स्वजन्याकांक्षाज्ञानादिसंबंधत्वेनैवाकांक्षाज्ञानादिजनकस्य शाब्दबोधादिहेतुत्वावाकांक्षाज्ञानादेर्हेतुत्व
मावश्यकमत आह लाघवमस्त्वित्याकांक्षाज्ञानादिजनकत्वेन हेतुतामपेक्ष्य आकांक्षाज्ञानत्वादिना हेतुतायामवश्यं दृक्कल्प्ता
घवादित्यर्थः। इदं प्रथमोपस्थितत्वादि प्रकृत इति अनुमितावपि परामर्शहेतुत्वे ज्ञानकत्वे प्रथमोपस्थितत्वादि पुरस्काय
रामर्शत्वेनैव हेतुत्वौचित्यादिति भावः। ज्ञानत्वेन कारणत्वं स्वं दूषयितुमाह इदं पुनरिति विशिष्टविषयितेत्यादिविशि
ष्टवैशिष्ट्यावगाहिनिश्चयत्वेनानुमितिहेतुत्वे तद्व्यापकीभूतेन व्याप्त्यादिज्ञानत्वेन तत्र हेतुत्वं तत्पाद्यस्ततरां तद्रूपेण का
रणत्वाभावे हेतुत्वगर्भत्वात्तस्येति भावः। तद्व्यक्तित्वेति तद्धर्मावच्छिन्नकार्यतानिरूपितकारणतापर्याप्त्यधिकरणं यद्यद्व्यक्तिकं तद
व्यापकरूपेणैव तद्धर्मावच्छिन्नं प्रति हेतुत्वादित्यर्थः। विशिष्टपरत्वावच्छिन्नजनकतावच्छेदकस्य पक्षतागतत्वस्य व्यापकेना
विष्टधर्मत्वेन स्वत्वावच्छिन्नं प्रति जनकत्वात् तदवच्छिन्नत्वे सुक्ते न चैवं व्याप्तिज्ञानजन्यतापत्तिः धूमलिंगकवह्न्यनुमितित्वेन व्याप्तिविशिष्ट
वैशिष्ट्यावगाहिपरामर्शजन्यतायाः पर्वतो वह्निमान् धूमलिंगकवह्न्यनुमितित्वेनावच्छिन्नं दकं धर्मावच्छेदं प्रति व्याप्तिज्ञानत्वेन

विशिष्टपरामर्शत्वेन वह्निहेतुत्वादर्शकैवेति दिक् नैतितिचात्र धूमधर्मिकव्याप्तिज्ञानत्वेन व्याप्यतारीभूतपरामर्शप्रकारसत्त्वानुमिति
कारणतायां पर्वतमहानसादिप्रसिद्धकधर्मिकधूमलिंगकवह्न्यनुमितित्वस्येव कार्यतावच्छेदकत्वात्स्वपरामर्शे देन परामर्शत्व
स्यानुगतत्वात् पर्वतमहानसान्यतरधर्मिकवह्निव्याप्यवत्तापरामर्शप्रकारसत्त्वात् धूमलिंगकवह्न्यनुमिति